Chap-1

प्रथमःपरिच्छेदः

(क)पृष्ठभूमिः

भारतीयसाहित्यशास्त्रे रससिद्धान्तोऽयमतीव प्राचीनतमः सिद्धान्तः। रससिद्धान्तस्य प्रस्थापकः आचार्यनन्दिकेश्वरः आसीदिति काव्यमीमांसा ग्रंथस्याध्ययनेन ज्ञायते। आचार्यनन्दिकेश्वरोऽयं भरतादपिप्राचीनतमः इति शास्त्रज्ञैः प्रतिपाद्यते। रसंह्येवायंलब्ध्वेवायमानन्दी भवतीति छांदोग्योपनिषदि प्रतिपादितं दृष्यते। तस्यैव प्रतिकृतिः शब्दब्रह्मणो ग्रंथकारेण पुरतो निधीयते, प्रस्तूयते, विधीयते च रसमयी। आनन्दोजीवस्य धर्मः। नायं रसः आनन्दात् व्यतिरिच्यते। रस्यते आस्वाद्यतेऽसौ इति रसः। प्राणभूतो सकलोऽपि व्यापारो रसाभिलाषमूलः। न केवलं काव्यकलापे अपितु व्यवहारजगत्यपि च प्राणभूतं रसमुद्दिश्यैवाहारविहारादि प्रवृत्तिः। आनन्दमभिलक्ष्यैव विषयेष्वभिनिवेशः। एतस्मादेवहेतोः काव्यजनित आस्वादोऽपि रस एव। तस्य स्वरूपं हि न ब्रह्मणो रूपाद्भिन्नम्। उक्तञ्च साहित्यदर्पणकारेण——

सत्वोद्रेकादखण्डस्व प्रकाशानन्दचिन्मयः।
वान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः।।
लोकोत्तरचमत्कारप्राणःकैश्चित्प्रमातृभिः।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः।।१

वैदिकयुगे ऋग्यजुस्सामाथर्वादि वेदेषु रसस्य विस्तरेण चर्चा दृश्यते। सोमरसस्य पोषकरसास्पदत्वेन सुवीरत्वं परित्रातृत्वं च व्याख्यायते। एते प्रयोगाः रसपदस्य द्रवरूपे वनस्पतिसारेऽर्थे मूलतो प्रसिद्धाः। सोमरसोऽयम् स्वकीयेनास्वादेन गुणेन च तत्कालीनाचार्याणां प्रियतरोऽभूत्। सोमरससंसर्गेण रस-पदार्थ-परिधिः क्रमाच्छक्तिमदपर्यन्तश्चाह्लादं यावद् विस्तीर्णः। आह्लादस्याप्यर्थः यथानुभूत्यासूक्ष्मतरतां सूक्ष्मतमतां चाभजत्। अयं रसः जीवनाह्लादाद् आत्माह्लादे परिणमत्। अस्याथर्ववेदे पर्याप्त प्रमाणानि सन्ति———

अकामोधीरोऽमृतः स्वयम्भूरसेनतृप्तो न कुतश्चननोनः।
तमेवविद्वान न बिभाय मृत्योरत्मानं धीरमजरं युवानम्।।२

नूनम् अकामो धीरश्च स्वयंभूरमृतश्चात्मा स्वेन च रसेन स्वयं तृप्तो भवति, स कुतश्चनापि कारणान्न्यूनो न विद्यते। तं धीरमजरं युवानमात्मानं विद्वान मृत्योर्नविभेति इत्याशयः।

(ख) रससिद्धान्तस्य पुरातनत्वम्

वेदेषु-उपनिषत्सु 'रसपदं' द्रव्यार्थे तथा न प्रयुज्यते यथा तत्पोषिकायां शक्तौ, तदास्वादे च, तथाहि—

येन रूपं रसंगंधंशब्दान् स्पर्शांश्च मैथुनान्।
एतेनैवविजानाति किमत्रपरिशिष्यते एतैद्वैतत्।।३

रूपरसगंधशब्दस्पर्शमैथुनादीनामनुभवः खल्वात्म सन्निधानादेव भवति। व्यवहारतो रसः किल रसनेन्द्रियस्य विषमः। परमार्थस्तु सोऽयं न तन्मात्रम्। तदेवायं रसः शब्दगुणद्रव्यप्रभृतीनि नामानि बिभ्रत सांख्यवैशेषिकादीनां दर्शनां गोचरतां गतः। यत्रास्य सूक्ष्मं गहनं च विश्लेषणं विहितम्। रस पदस्य भौतिकाध्यात्मिकयोरर्थयोः सीमानौ मिथः सन्निधितो रसपदं भौतिकार्थपरिधिमुल्लंघ्य आध्यात्मिक क्षेत्रं प्रविशति। तत्र हि रसत्वे भौतिकोरसः प्रतिषिध्यते सर्व रसत्वे चाध्यात्मिको रसाः विधीयते। रसपदस्यायमाध्यात्मिकोऽर्थः तैत्तिरीयोपनिषद् वाक्ये नानेनाधिकं विशदीभवति———

'रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति।'४

एतैश्चोद्धरणैर ज्ञायते यद् रसस्य कस्मिंश्चिदत्यन्तनूतनेऽर्थे काचिदुद्भावना न जाता, अपितु एक एवार्थः क्रमेण सूक्ष्मातिशयं प्राप्त इति। इत्थं रसपदस्यमुख्योऽर्थः खल्वन्नरसो, वनस्पतिरसो, द्रव्यरसो वेति तावदासीत्। ततः द्रव्यरसास्वादस्य वाचकतां गतम्। अतो रसपदार्थ परिधौ विकासक्रमेण तदास्वादातिरिक्ता ऊर्जः प्रभृतयः तन्मयतादयश्च गुणाः अपि सन्निविष्टाः। सैव रसपदार्थो वैदिकवाङ्मये अन्नरसादारभ्य ब्रह्मरसार्थपर्यन्तमभवत्। वेदेभ्यः परं रामायणमहाभारतयोः कालोऽवलोक्यते। वाल्मीकीयरामायणस्य प्रचलितेषु पाठेषु बालकाण्डस्य चतुर्थे सर्गे रसानामस्पष्टो निर्देशः दृश्यते———

पाठ्येगेये च मधुरं प्रमाणैस्त्रिभिरान्वितम्।
जातिभिः सप्तभिर्बद्धं, तन्त्रीलयसमन्वितम्।।
रसैः शृङ्गार करुण हास्य रौद्र भयानकैः।
वीरादिभिश्च संयुक्तं काव्यमेतद्गायताम्।।५

एतेनष्पष्टं भवति यद् बाल्मीकीयरामायणादारभ्य वस्तुतः रसानां चर्चा दृश्यते। कौटिल्लीय अर्थशास्त्रे तथा वात्स्यायनस्य कामसूत्रे च रसानां चर्चा केवलं नाममात्रं दृश्यते। कामशास्त्रे वर्णितं रसशब्दो केवलं रत्यर्थे कामशक्त्यर्थे गृह्यते।

'रसोरतिः प्रीतिर्भावो रागोवेगः समाप्तिरिति रतिपर्यायाः।६

एकत्र तु काव्यशास्त्रीयेऽप्यर्थे रसशब्दस्य सफुटोप्रयोगः दृश्यते। यथा 'तदिष्टरसभावलीलानुवर्तनम्।'७ कामसूत्रे जयमंगलटीकायां नायकस्य श्रृंगारादिषु य इष्टो रसो भावः, स्थायिसंचारि सात्विकेषु याश्चलीलाचेष्टितानि सर्वाण्युपलभ्यन्ते। भूयांसो विद्वांसोऽत्र मन्यन्ते वात्स्यायनीयं कामसूत्रस्य कदाचिद् ईसापूर्वे चतुर्थशतके ख्रिष्टाब्दपूर्वे रचना अभवत्।अयमेव सूत्रकालेत्युच्यते। कामसूत्राणां रचना भरतसूत्राद्पूर्वमेव इति विदुषां मतम्। अथेदं वक्तुं शक्यते यद् भरतसूत्रादेव रससिद्धान्तस्य सरणिः पल्लविता पुष्पिता चाभवत्।

(ग) रससिद्धान्तस्य परिकल्पना

रससिद्धान्तस्यविकासः प्रायः रामायण महाभारतयोरनन्तरं भरतसूत्र प्रणयनाच्च पूर्वतरं कामसूत्र प्रभाव परिणामतश्चतुर्थात् पञ्चमाद्वा ख्रिष्टपूर्वाच्छतकादारभ्य द्वितीये तृतीये वा तत्पूर्वशतके जातः स्यादिति विदुषां मतम्। भरतात्पूर्वमेव रससिद्धान्तसय सूत्रपातो जातः इत्यनेन सिद्धो भवति। भरतसूत्रेषु रसप्रतिपत्तिस्तथा सांगोपांगा परिपूर्णा च वरीवर्ति। नाट्यशास्त्रे सर्वत्रोद्धृता आनुवंश्यश्लोकाः स्वयमेवात्र प्रबलां प्रमाणतामुपयान्ति। यद् भरतात्पूर्वं शिष्य-प्रशिष्य परम्पराश्रयेण रससिद्धान्तश्चिरात्प्रचलन्नवर्ततेति। अभिनवगुप्तपादाचार्यस्यसाक्ष्येण पूर्वाचार्यैर्लक्षणरूपणैषां निरूपणमकारि भरतेन च पारम्पर्यक्रमागतानामेतेषां स्वकृत विवेचन पुष्टये यथास्थानं विशदं विवेचनं कृतम्। आचार्यभरतापेक्षया नन्दिकेश्वरस्यासीत् रससिद्धान्तेन सह घनिष्ठतरः सम्बन्धः इति पूर्वं मया प्रतिपादितम्। अथेदं वक्तुंशक्यते यद् भारतीय सौन्दर्यशास्त्रस्य द्वे शीर्षणी स्तः रसोऽलंकारश्चेति। अनयोरलंकारस्यालाम्बनमासीत् व्याकरणम्, रसस्य च कामसूत्रम्। अत्रैतज्जिज्ञास्यते यत् कामसूत्रस्य किमवलम्बनमिति वयं तावदथर्ववेदमेव तन्मन्यामहे। आथर्वणा हि लौकिकीमेव जीवनसिद्धिं प्रमाणीकृतवन्तः। अतएवाथर्ववेदे विविधाः भौतिकीर्बाधाः निराकर्तुं कामनाव्यवस्था चाप्यस्ति। तदन्तर्गततया अनेकेषां नारीणां स्नेहं प्राप्तुं, तासां प्रसादनाय नानोपकरणानि सञ्चयितुं सपत्नानां सपत्नीनाञ्च विरोधं शमयितुं, अभिसारादि सौविध्यानि लब्धुं, दाम्पत्यजीवनञ्च सुखयितुमनेकेषामभिचार मन्त्राणाम् समावेशो विहितः। संभवतस्ते एव मन्त्राः कामसूत्रस्योद्गम स्त्रोतांसि सन्ति। अस्माकमिदमनुमानं वेद-विद्यायाः सुविदितस्य विदुषो वेबरस्यमतमिदं पुष्णाति यत्परिवर्तिनि संस्कृतसाहित्ये धार्मिक स्तोत्राणि, ऋग्वेदोक्ताभिः ऋग्भिः प्रेरितानि, ऐहिकानि श्रृंगारयुक्तानि चाथर्ववेदोक्तैर्मन्त्रैरिति।

उक्तञ्च नाट्यशास्त्रे———

जग्राहपाठ्यमृग्वेदात्सामभ्योगीतमेव च।
यजुर्वेदादभिनयान् रसानथर्वणादपि ।।८

पण्डितबलदेवोपाध्यायेन रससिद्धान्तस्य सम्बन्धो वाल्मीकिना सह संस्थापितः। आचार्यानन्दवर्द्धनाभिनवगुप्तयोः प्रामाण्येन च क्रौञ्चबध- विषयकेषु श्लोकेषु रससिद्धान्तस्यबीजमुपन्यस्तम्-----

पादबद्धोऽक्षर समस्ततन्त्रीलयसमन्वितः।
शोकार्तस्यप्रवृत्तोमेश्लोकोभवतिनान्यथा।।
समाक्षरैश्चतुर्भिर्यः पादैर्गीतो महर्षिणा।
सोऽनुव्याहरणात्तस्यःशोकःश्लोकत्वमागतः।।६

अत्र काव्यगतश्छंदोविशेषः एव श्लोक पदार्थः। आनन्दवर्द्धनस्य समक्षमपि तदा कालिदासस्येयमेवोक्तिरासीत् यदा तेन रसस्थापना- यामादिकविः प्रमाणीकृतोऽभूत्------

काव्यस्यात्मा स एवार्थस्तथाचादिकवेर्पुरा।
क्रौञ्चद्वन्द्ववियोगोत्थःशोकःश्लोकत्वमागतः।।१०

अथ बाल्मीकिहृदये वासनात्मतया स्थितः शोकस्थायिभावः क्रौञ्चव- धदर्शनेन रससामग्रीं प्राप्तः। मृतः क्रौञ्चौविषयालम्बनम्, जीवन्तीक्रौञ्ची चाश्रयालम्बनम्,तद्विलापोऽनुभावः, एतच्चर्वणया मुनेः शोकः क्रौञ्चीशोकेन सह तदाकारतां गतः। सेयं मनः स्थितिरलौकिकीलौ- किकशोकभिन्नत्वात्। तदास्वादनं च चित्तद्रुत्यात्मक तयैवोपपन्नम्। यथाजलपूर्णात् घटः समुच्छलति, भावनाविवशा चित्तवृत्तिर्वा स्वतः एव विलापप्रलापाभ्यामभिव्यज्यते तथैव शोक भावनातिभरा वेशादुचितशब्दवृत्तयोर्निमन्त्रितः शोकसंतप्तकालमेव वाल्मीकिशोकः श्लोकतयापरिणतः। रसः काव्यस्यजीवितं तत्वम् अथरसदशायामेव काव्यं जातम्। अतो रसवादबीजानीमानि प्रथमतया बाल्मीकीयरामायणे एवोपलभ्यन्ते। आनन्दवर्द्धनादपेक्षयाततोऽप्यधिकमभिनवगुप्तोबाल्मीकिप्रामाण्येन रसध्वनिवादस्थापना व्यग्रोविलोक्यते। रसशास्त्रस्य शास्त्रीयं विवेचनम् यत् बाल्मीकिना संकेतितम् तत् आनन्दवर्द्धनस्य कारिकायां स्थायीभावस्यरमणीयार्थात् रसशास्त्रीयं विवेचनं लेशतोऽपि न संकेतितम्।आचार्याभिनवगुप्तपादेनानन्दवर्द्धनात्परं जातं शास्त्रीयं विवेचनमाश्रित्येव वाल्मीकेच्छंदांसि रसशास्त्रीयशब्देर्व्याख्यातानि।रामायणात्परं महाभारते ब्राह्मणग्रंथेष्वपि च श्रृङ्गारशान्ताद्भुतरौद्रबीभत्सभयानकादीनां, श्रृंगारेऽपिच संयोगवियोगयोरनेका- न्यपूर्वाणिवर्णान्यासाद्यन्ते। परमत्ररस- स्यचर्वणा न स्पृष्यते अपितु तस्यशास्त्रीयं विवेचनम् आचार्यभरतमुनि- प्रणीतनाट्यशास्त्रे षष्ठ,सप्तमयोरध्याययोः सविस्तरं रसभावादि निरूपितं वर्तते। आचार्यभरतमुनिना नाट्यशास्त्रस्यषष्ठेसप्तमेचाध्याये रसनिरूपणं वर्णितं विवेचिताश्च। सप्तमेऽध्यायेसञ्चारिसात्विकभावानां निरूपणमुपन्यस्तम्। अध्यायान्तरेषु तेनशिष्टारससामग्र्यानुशिष्टाः नायिकायाः अङ्गजाःसहजाः अयत्नजाश्चालंकाराः कामदशाः अवस्थानुसारिणो नायिकानां वासकसज्जादयोऽष्टौभेदाः प्रकृत्यनुगताः उत्तममध्यमाधमास्त्रयाः अन्ये च

नायक-नायिकाप्रभेदाः दूती प्रसङ्गश्चेति विविधाः विषयाः संवर्णिताः। एभ्योतिरिक्तानां सङ्गीताहार्याभिनयवा- द्ययंत्रप्रयोगादीनां प्रसङ्गेऽपि रसश्चर्चितः। एषां प्रसङ्गे रसानां प्रासङ्गिकं स्वरविधानं, वाद्ययंत्रप्रयोगः वेषभूषादिरचना च एतत्सम्यक् व्यवस्थापितम्। इत्थमिह नाट्यशास्त्रे कृत्स्नापि रससामग्री यथास्थानमासाद्यते। भरतस्य हि विवेचनं विशदं वर्णनञ्च सर्वत्रसाङ्गोपाङ्गम्। आचार्यभरतः स्फुटं नाटकमेव वाङ्मयस्य परमं रूपमाह, नाटकस्य च प्राणः रसः, रसं बिना हि किमपि नाट्यमङ्गं न प्रसरतीति। नाट्यस्यमुख्येष्वङ्गेषु पाठ्याभिनय सङ्गीतरसेषु पर्वेषां त्रयाणां नियन्ता चतुर्थो रस एव। आचार्यभरतेन नाट्यशास्त्रे इदं प्रतिपादितं यत् नाट्यवस्तुनोऽभिनयस्य सङ्गीतस्य च विधानेन सर्वथा रसानुकमैनैव भवितव्यम्। नाट्यवृत्तीनामपि सर्वथा रसाश्रयत्वं भरतस्य सम्मतम्। नाट्ये प्रयोज्यस्य काव्यतत्वस्यापि बहुकृतरसमार्ग इति विशेषणमनिवार्यम्। अलङ्कारगुणलक्षणदोषाणां विवेचनमपि वाचिकाऽभिनयाङ्गतयैवोपक्रान्तम्। वाचिकोऽभिनयश्चायं रससाधनम्। अतः काव्यस्येमानि निखिलान्यपि तत्वानि परम्परया रसमेवाश्रयन्ते। एतैश्चप्रमाणैरसन्दिग्धतयेदं सिध्यति यथा रससिद्धान्तोऽयम् प्रथमतया स्वतः परिपूर्णतया च नाट्यशास्त्रे एव प्रतिपादितम्। आचार्यभरतस्य मुख्यं प्रतिपाद्यं नाट्यमेव। अभिनवगुप्तमतेन च तेन रस एव नाट्यमिति भरतस्याभिमतम्।

एवमनेन ज्ञायते यद् साहित्यशास्त्रस्येतिहासकाराः नन्दिकेश्वर कृतस्य ग्रंथस्यनुपलब्धत्वात् भरतमेव रसस्याद्यमाचार्यमवगच्छन्ति।'कर्तव्याः काव्येषु रसाः बुधैः' इत्युक्तत्वा आचार्यभरतेन यस्यां रचनायां रसः सैव काव्यमिति निगदितम्।

घ-वेदादिशास्त्रेषु-उपनिषत्सु-रामायण-महाभारतादिषु ग्रंथेषु रसस्य मनोवैज्ञानिकं तथा दार्शनिकमनुशीलनम्।

वेदादिशास्त्रेषु स्वतंत्ररूपेण रसस्य दार्शनिकं तथा मनोवैज्ञानिकं विवेचनं नैव प्राप्यते। तथापि परोक्षरूपेण रसस्यसत्ता दरदृश्यते। आयुर्वेदे दैहिकविकास निदानभूतस्तद्गत-ग्रन्थिरसोऽपि रसपदार्थत्वेन व्यवह्रियते। रसशब्दस्य प्रथमोऽर्थः पदार्थसारभूतो द्रव इति वेदेषु वैशद्येन प्रतिपद्यते। श्रूयते किल वनस्पति समुद्भूतस्य रसस्य वैदिके प्रचुरः प्रयोगः। परन्तु उपनिषत्सु रसपदं द्रव्यार्थे तथा न प्रयुज्यते यथा तत्पोषिकायां शक्तौ तदास्वादे च ऊर्जसि आस्वादे च रसपदमनेकेषु संदर्भेषु दृश्यते।

औषधिभ्योऽन्नम्, अन्नाद्रेतः, रेतसः पुरुषः स वा एष पुरुषोऽन्न-रस-मयः।११ एवं द्रव्याद् द्रव्यजन्याद् ऊर्जः प्रभृतेश्च रसपदस्य तन्मात्रार्थे प्रयोगः————

'येन रूपं रसं गंधं शब्दान् स्पर्शांश्च मैथुनान्।

एतेनैव विजानाति किमत्र परिशिष्यते, एतद्वैतत्।।१२

रूपरसगंधशब्दस्पर्शमिथुनादीनामनुभवः खल्वात्म सन्निधानादेव भवति। वस्तुतः व्यवहारतो रसः खलु रसनेन्द्रियस्य विषयः परमार्थतस्तु सोऽयं तन्मात्रम्। तत् एवायं गुणद्रव्यप्रभृतीनि नामानि विभ्रत सांख्यवैशेषिकादीनां दर्शनानां गोचरं गतः। यत्रास्य सूक्ष्मं गहनं च विश्लेषणं विहितम्।'अशब्दमरूपमव्ययं तथाऽरसं नित्यमगंधवच्च यत्।१३ इति कठोपनिषदि पठ्यते। यद्यपि भौतिकेऽर्थे परमतत्वमिदमरसमेव तथापि पारमार्थिकेऽर्थे स सर्वरसो भवति।'मनोमयः प्राणशरीरोभाररूपः सत्यसंकल्पः आकाशात्मा सर्वकर्मा सर्वकामः सर्वगंधः सर्वरसः।'१४ 'पिबत्वस्य गिर्वणः'१५ इति ऋग्वेदे गीतरसिकं देवं गीतरसं पातुमान्त्रयते।

'वचःस्वादः स्वादीयो रुद्रायवर्द्धनम्'१६ इति रुद्रं प्रसादयितुं स्वादुतोऽपि स्वादीयो वचनमुच्चारयति 'मध्वऊषु मधु युवा रुद्रा सिषक्ति पिप्युषीति'।१७ इतिमधुरुचये रुद्रगणाय मधुवर्षिणीं वाचं प्रस्तौति।'वाचा वदामिमधुमद् भूयासं मधुसन्दृशः'१८इति न केवलं मधुरं अपितु मधुदर्शिनीत्वं वाचो विज्ञापयति।ऋग्वेदे ऋषिभिः प्रयुक्तानि पानक्रिया संवलितानि स्वादुमधुरादीनि वाग्विशेषणानि नूनमिदं विशदयन्ति यद्वाक्चमत्कारं मधुरपेयरसात्मकतयापि ऋषयः प्राकल्पयन् सोमरसं प्रति निर्बाधेनाकर्षणेनापि कदाचिदयं बिम्बः प्रतीको वा तेभ्यः समरोचत। वाक्यचमत्कारस्यकृते प्रथमं आस्वादः ततश्चास्वाद्यं प्रति रस इति। लाक्षणिकरसप्रयोगस्य बीजं तत्रैवोपालभ्यत इति वयमवधारयामः। वेदेभ्यःपरं रामायणे महाभारतेऽपि रसस्यदार्शनिकं तथा मनोवैज्ञानिकं निरूपणं यत्र-तत्र दृश्यते———

पाठ्ये गेये च मधुरं प्रमाणैस्त्रिभिरान्वितम्।
जातिभिः सप्तभिर्बद्धं तन्त्रीलय समन्वितम्।।
रसैः श्रृङ्गार करुण हास्य रौद्र भयानकैः।
वीरादिभिश्च संयुक्तं काव्यमेतद् गायताम्।।१९

किमप्यसामान्यं सौन्दर्यसुन्दरं वस्तुं विलोक्य तदर्थमस्मदीये मनसि आस्वाद सम्बन्धिनी भावनोपपद्यते। सैव रस इति नाम्ना प्रथते। स्वादवान् स्वाद्यः पदार्थो रसनायां जलं जनयति, अतएव जिह्वा रसनमिति कथ्यते। श्रीमद्भगवद्गीतायां जिह्वा वाचकं रसनमित्येतद् पदं प्राप्यते—

'रसनं घ्राणमेव च।'

इन्द्रियाणां विषयान् प्रति यदाकर्षणं भवति तद् भगवद् दर्शनमन्तरेण न निरस्तं जायते। गीतायामुक्तम्——

'पुष्णामि चौषधीः सर्वाः सोमोभूत्वा रसात्मकः।'२०

सुखं वा आनन्द एव रस इत्येतद्दुपरि कथितम्।छांदोग्योपनिषदि द्रष्टव्यमस्ति यत् सच्चिदानन्दमयब्रह्मणो द्वे रूपे मूर्तममूर्तमञ्च। इदमखिलमपि जगत प्रमेयात्मकं भूतं भविष्यञ्च तस्य ब्रह्मणो मूर्तरूपम्। इदं विश्वं मन्ये तस्य काव्यं यन्नक्षीयते न च

जीर्यति। तदेव रस्यते चक्षुरादिभिः अनुभूयते हृदयेन, चिन्त्यते मनीषया। रसयिता च स्वयमेव जीवभूतः। तस्यैव प्रतिकृतिःशब्दब्रह्मणा ग्रंथकारेण स्थाप्यते। अतएव काव्यजनितास्वादोऽपि रसमेव। तस्य स्वरूपं न ब्रह्मणो रूपाद् भिद्यते। मानवः सामान्योऽप्यतः काव्यमध्येतुं श्रोतुं कर्तुं च प्रयतते।स ततो रसं निपीय कृत कृत्यतां व्रजति।काव्याद् रसो यदानुभूयते तदा भवत्येव स्वरूपानुभूतिः कामं स्यान्न सा द्राघीयसी। अस्ति यद् हि स्वरूपं तद् आत्मा।

आत्मा हि शुद्धो बुद्धिश्चिन्मय सत्वमयः ज्ञानमयश्च निर्विकल्पक उपाधिरहितः। यदासामाजिकाः काव्यमनुशील्य तदवस्थां प्रपद्यन्ते तदा ते दुःखाद् निर्मुक्ताः भवन्ति। ते यान्तीन्द्रियातीतम् सुखम्।

'सुखमात्यन्तिकं यत् तद् बुद्धिग्राह्यमतीन्द्रियम्।'२१

द्वासुपर्णासयुजासखाया समानं वृक्षं परिस्वस्वजाते।

तयोरन्यः पिप्पलं स्वादुवत्ति अश्नन्नन्यो अभिचाकशीति।।२२

अत्रास्मिनश्लोकवाक्ये दर्शनस्य मौलिकतत्वानि तु प्रतिपादितानि परं साहित्यशास्त्रस्य दृष्ट्यापि परमसुन्दरमुदाहरणं वर्तते। काव्यस्यमनोहरभाषायां दार्शनिकतत्वस्येदृशं रमणीयं निरूपणं समग्रेऽपि साहित्ये क्वचिदेव लब्धं भवेत्। किञ्चैतस्मिन् मंत्रे 'सयुजा सखाया' इत्येताभ्यां पदाभ्यां जीवात्मपरमात्मनोर्नित्यतायाः सच्चिद्रूपतायाश्चाभिव्यक्तिरपि जायते। साहित्यचिन्तकाः रसं ब्रह्मास्वादसहोदरं मत्वा आध्यात्मिकरूपपर्यन्तं तं विधाय प्रदर्शितम्। तत्सुखस्य च तुलनां समाधिसुखेन सह अकार्षुः। रसस्य मनोविज्ञान दृष्ट्या या मीमांसा जाता सास्यदेशस्यैव संपत्।

आचार्य भरतकृता संकल्पना एतस्याः मीमांसायाः मूलश्रोतः। रसश्चित्तस्यैव रूपत्वेन मतोऽभूत्। तथाहि रसश्चित्तविद्रुतिः, चित्तदीप्तिः, चित्तस्य विस्तारो वा। परं भारतीय रसमीमांसायाः सर्वोत्तमं रूपं तदास्ति यत्र कलात्मिकतया दृष्ट्या रसो निरूपितो भवति। आनन्दवर्द्धन एव अस्य प्रथमो निरूपयिता। अस्मद्युगे शुद्धविज्ञानदृष्ट्यापि रसविवेचनस्योपक्रमः प्रवृत्ता वर्तते।

ड.-भरतनाट्यशास्त्रे-नटसूत्रे-कामसूत्रे च रसस्य दार्शनिकं मनोवैज्ञानिकं चानुशीलनम्।

भारतीयसाहित्यशास्त्रे रससम्प्रदायोऽयमतीवप्राचीनतमः। कोऽयमाचार्यः सर्वतः प्राक् रसनिरूपणमुपन्यस्तम्? इत्यत्र सन्ति विदुषां विप्रतिपत्तयः। साहित्यशास्त्रे पूर्वं सर्वैरालङ्कारिकैः भामहदण्डुद्भटरुद्रटादिभिरलङ्कारस्यैव महत्वं प्रतिपादितम्। न तैः रससिद्धान्त तथा मनोविज्ञान सम्बन्धे कुत्रापि विमर्शो विहितः । रससिद्धान्तस्य पूर्वं वेद-वेदान्त दर्शन शास्त्रेषु किं स्वरूपमासीत् रसस्य। पाश्चात्यदर्शनेषु मनोविज्ञानादिषु शास्त्रेषु किं स्वरूपमासीत् रसस्य? एतत् सर्वं पर्यावलोचयामः। रससिद्धान्तस्य

प्रक्रियात्मकः दार्शनिकश्च पक्षौ सुपूरातनौ। पूर्ववर्तिनां सर्वेषां रससिद्धान्त ग्रन्थानां विषयाः प्रतिपादिताः।परन्तु तैः मनोविज्ञान दृष्ट्या विवेचनम् नैवोपन्यस्तम्। वेदान्त न्यायमीमांसा काव्यशास्त्रादीनां सिद्धान्तमधिकृत्य पर्यवलोचनमावश्यकं भवति। इह पर्यवलोचिता रससिद्धान्त समीक्षयोः सार्द्धमित्यस्याः मञ्जूषायाः वैशिष्ट्यम्।

काव्यमीमांसाकारो राजशेखरो रससिद्धान्तस्य संस्थापकं नन्दिकेश्वरं सर्वप्रथम रससिद्धान्तस्यप्रतिपादकत्वेन स्वीकरोति। परन्तु साहित्यशास्त्रस्येतिहासकाराः नन्दिकेश्वरकृतस्य ग्रंथस्यानुपलब्धत्वात् भरतमेव रसस्याद्याचार्यत्वेन स्वीकुर्वन्ति। 'कर्तव्याः काव्येषु रसाः बुधैः' इत्युक्त्वा आचार्यभरतेन यस्यां रचनायां रसः सैव काव्यमिति। प्रायः रसस्यशास्त्रीयं स्वरूपं भरतमुनेर्नाट्यशास्त्रादेव पण्डिताः स्वीकुर्वन्ति।

यद्यप्याचार्यभरतमुनेर्पूर्वमपि रससिद्धान्तस्य परम्परासीदिति नाट्यशास्त्रस्यावलोकनेन ज्ञायते। राजशेखरमते न भगवता ब्रह्मणा काव्यं विषयभेदेन अष्टादशशिष्येभ्यो व्याख्यातम् तैश्च स्वविषये लक्षणग्रंथः विरचिताः। यथा तत्र 'कविरहस्यं सहस्त्राक्षः:सुवर्णनाभः, आनुप्रासिकं प्रचेतायनः, यमकं यमः, चित्रं चित्राङ्गदः,शब्दश्लेषं शेषः, वास्तवं पुलस्त्यः, औपम्यमौपकायनः, उभयालङ्कारकं कुबेरः, वैनोदिकं कामदेवः, रूपकनिर्णयं भरतः, रसाधिकारिकं नन्दिकेश्वरः, दोषाधिकारिकं धिषणः,गुणौपादानिकमुपमन्युः,औपनिषदकं कुचमारः।'२३ इत्यनेन ज्ञायते यत् नन्दिकेश्वरः रससम्प्रदायस्य प्रधानाचार्यः आसीत्। आचार्यभरतमुनिना केवलं प्रणयनमेव कृतम्। नन्दिकेश्वरस्तु रसाधिकरणप्रणेतासीत्।आचार्येण भरतमुनिनापि नाट्यशास्त्रस्यावसाने नन्दिकेश्वरस्य नामैव स्मृतम्। अभिनवभारत्यामपि नन्दिकेश्वरमतेन रंगाविधिर्दर्शिता वर्तते। भारतीयपरम्परायां प्राचीनतमाः वेदाः स्वीक्रियन्ते। नाट्यशास्त्रेऽपि यानि तत्वानि तानिवेदेभ्यः एव समानीतानीति। यथा 'जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतिमेव च। यजुर्वेदादभिनयान् रसनाथर्वणादपि।।२४

ग्रंथस्यारम्भे नाट्यस्त्रस्य पञ्चमवेदत्वेनोक्तम्। पञ्चमवेदत्वं तन्निमित्तमेवोक्तम्। यद् ऋग्वेदादिचतुर्वेदानां द्विजातिष्वेवाधिकारस्तत्र सर्ववर्णानां कृते निर्मितिमिदं नाट्यशास्त्रोऽयं पञ्चमोवेदः।

न वेदव्यवहारोऽयं संश्राव्यः शूद्रजातिषु।
तस्मात् सृजाम्यपरंवेदं पञ्चमं सार्ववार्णिकम्।।२५

तस्माद् ऋग्यजुस्सामाथर्ववेदेभ्यः संकलनं विधाय नाट्यशास्त्र नाम्ना पञ्मोवेदः प्रणीतः। पुनस्तस्यरसस्य विवेचनायामेष नाट्यशास्त्रस्य प्राथम्यं ज्ञातुं शक्यते। न केवलाथर्वणाद् यावद् वेदान्तरेभ्योऽपि इमे रसाः संगृहीताः स्युरिति। 'विभावानुभावव्यभिचारिभावसंयोगाद्रसनिष्पत्तिरिति' महर्षिभरतप्रतिपादितं रससूत्रम्। रससूत्रे प्रतिपादिते भावशब्देन मनसि विचारः जायते। अथ कोऽयम् भावः? भाव

इत्युक्ते यो विभावैर्निष्पद्यते वाचिकाङ्गिक सात्विकैरभिनयरूपैरनुभावैर्गम्यते। प्रतीतियोग्यः क्रियते सैव भावः। य श्चतुर्विधाभिनयेन कविगतं भावं भावयति सैव भावपदार्थः। वस्तुतः भावशब्दः काव्यस्य नाट्यस्य वा संवेद्य तत्वस्य संवेदकतत्वानां वेगानां वा वाचकः। मनोवेगानां मानसिक शारीरिकानुभूतीनां चेतना मात्राया वा न द्योतकः। आचार्यभरतमतेन ये रसान् भावयन्ति ते भावाः। भावश्चैकोनपञ्चाशत् संख्याताः संभवन्ति। अष्टौ स्थायिभावाः त्रयस्त्रिंशत् च सञ्चारिभावाः, अष्टौ च सात्विकाः भावाः सर्वानाहत्य काव्यरसाभिव्यक्ति हेतवः एकोनपञ्चाशद्भावाः संभवन्ति। एते भावाः मनोवेगाः मानसिकशारीरिकानुभूतीनां काव्यगतानां चारुत्वं प्रतिपादयन्ति। भावस्य सामान्यतः लक्षणमिदं क्रियते ये चेतनां व्याप्नुवन्ति ते भावाः। बाह्यजगत्सम्पर्कोत्पन्नत्वे सति चेतना व्यापक मनोविकारत्वं भावत्वमिति। बहवः मनोवैज्ञानिकाः भावस्य स्वतन्त्रां सत्तां न स्वीकुर्वन्ति। संस्कृतकाव्यशास्त्रे लौकिकस्य भावस्य वर्णनं स्वभावादेव नास्ति। तत्र तु काव्यगतानां भावानां रसव्यञ्जकानां स्थायिसञ्चारिणामेव वर्णन विवेचने स्तः। आचार्यभरतात्पण्डित-राजजगन्नाथं यावत् स्थायि सञ्चारि विवेचनं प्रायः सर्वैराचार्यैः कृतम्। स्थायिभावाः सर्वथा शुद्धमनोविकाराः इति वक्तुं न शक्यते। यथा निर्वेदः शमो वा कश्चिच्छुद्ध विकारो नास्ति। व्युत्पन्न मनोविकारस्य प्रश्नोऽपि सर्वेषां कृते नोत्तिष्ठति। भयक्रोधादयः स्फुटमेव मौलिकाः। मनोवृत्तिवदेवस्थायिभावोऽपि भावान्तरेभ्यः स्थायितरो भवति। मनोवृत्तिवदेव स्थायिभावोऽपि एका मनोदशा यत्र भावान्तराणि सञ्चरन्ति। मनोवृत्तिर्व्याप्तमनः स्थितिमात्रम् यस्याः समग्रं रूपं न जात्वनुभवनीयम्। मनोवृत्तेः सञ्चारिणः एवास्वाद्या भवन्ति न स्वयं मनोवृत्तिः। यथा देशभक्तिरनास्वाद्या तदाश्रिताः सञ्चारिभावाः उत्साह प्रभृतयः एवास्वाद्या भवन्ति। मनोवृत्तिः सदैव मनोविकाराणामावृत्या संपद्यते। परं स्थायिभाव विषये न सत्यमिदम्। मनोवृत्तिः सदैव विचारमूलिका परन्तु स्थायिभावः प्रवृत्तिमूलको भवति, न विचारमूलकः। इत्थं स्वीकृतरूपे॰ तु स्थायिभावस्य साहित्यशास्त्रोक्तं स्थायिमनोविज्ञान परिभाषासु सामग्र्येण न घटते। तथापि न तदमनोवैज्ञानिकम्। तस्याप्यस्ति स्वसङ्गतिः। रससिद्धान्तस्य मूलस्वरूपं किम्?

अयं रसः कः इति? मनीषिणः वदन्ति 'चेतनायां विश्रिष्टा परिणितिर्हि रसः।' नाटकादि दर्शनात् काव्यस्यचाध्ययनात् श्रवणाद् वा रसः आविर्भवति। तदा तस्य सौन्दर्य मानवः प्रेक्षते। तस्य च स बोधं विदधाति। तन्मानसे रसः सञ्चारितुमारभते। अस्यामनुभूत्यां समग्रो निधिरतीतानागतपरक आत्मानमभिव्याप्य समुपस्थितः सञ्जायन्ते। रसचेतना सर्वथैवोन्मीलिततयाश्रिया सचेतसात्मनोऽखण्डालोकेन दीप्यमानोभूत्वा प्रादुर्भवति। ऋषयो रसत्वेनपरमेश्वरं व्यक्तीकृत्य स्पष्टतया रसस्यानन्तानन्दमयत्वं प्रतिपादितवन्तः। अनेनेदंज्ञायते यत् सौन्दर्य चेतनायाः कलात्मकतायाः आधारभूताः नृत्य-नाट्य-सङ्गीत-चित्रकलाः सन्ति। उसाहित्यशास्त्रे

रसमीमांसायाः विचारणा मनोविज्ञानस्य महीं एव जाता। सौन्दर्यतत्वस्य मानसिक्याधारभूताः पदार्थाः मनोविज्ञानस्येव धरातले प्रादुर्भवन्ति। आचार्यभरतमुनेः रससूत्रस्यावगाहनात् तथ्यमिदं संलभ्यते यत् सर्वेषामपि रसानां शम एवान्ततोगत्वा परिणमनात् अध्यात्मवादिनो रसस्य परिग्रहणमात्मनश्चेतनायाः स्वरूपत्वेन कुर्वन्ति। अस्ति च आत्मन् आनन्दमयं स्वरूपम्। इदं हि स्वरूपं कलायाः सौन्दर्यमुन्मीलयति। व्यवहाराः वासनश्च चिदात्मन् उपरि आवरणं प्रक्षिप्य तं परमार्थतः आनन्दाच्च दूरे नयन्ति। अध्यात्मवादिनां मते रसानुभूतेः सम्बन्धः आत्मनः वा सहृदयरसचेतनया सार्धमस्ति। व्यावहारिकजीवने वासनाश्चेतनां जडत्वाद्यावरणवृतां विधाय तदीयं विशुद्धमाध्यात्मिकं सुखं हरन्ति। रसानन्दे व्यवहारापेक्षिणीभ्यः स्थितिभ्यो मुक्तोभूत्वा आत्मा निस्सीमतां याति। एतस्याः अनुभूतेः परमं सुखम् रसे सन्निविष्टं भवति। यदाध्यात्मिक्यां दृष्टिं विहाय कलादृष्ट्या रसस्य विवेचनं क्रियते तदा रसस्य विशुद्धाध्यात्मिकानुभूतित्वं न सिध्यति। तदा रसविषयकानुभूतिः न समाधिविषयकानुभूतिरिव भवति। रसे इन्द्रियाणि सौन्दर्यं साक्षात्काररीत्योपभुञ्जन्ति, प्राणश्च तल्लीनाभवन्तः संप्लवन्ते। मनोबुध्यादिकानां वृत्तयः कामपि प्रीतिं विन्दमाना विराजन्ते।

एषारसमीमांसा तु भारतीयाऔनिषद्की परम्परायाः जायमाना सारभूता तत्वाभिनिवेषिनी ग्राहिका। रसास्वादने मनोबुद्धिचित्ताहङ्कारप्राणेन्द्रिय शरीराणां न विलयो जायते अपि तु तदा सर्वेषामप्येतेषां नवोन्मेषो, नूतनं स्फुरणं, दिव्यजागरणं च जायन्ते। कदापि तमोऽवस्थायां रसास्वादनं न भवति। न च मनसो मलीमसदशायां , नच चिन्ताग्रस्ते चित्ते, न चाहंभावस्योद्रेके, न च प्राणेन्द्रियादि कानामुत्तेजोग्रस्तास्वस्थतायामेव। तेषांसर्वेषांप्रवृत्तिरुन्मुखता गतिश्च व्यवहारेभ्योऽखिलेभ्यः आवश्यकताभ्यश्च सर्वाभ्यो निवर्तन्ते। सावस्था ज्ञानं विहाय संसारमपि वृणुते कदापि च स तं हित्वात्मानं ज्ञाने रमयति। निश्चप्रचतयाबुद्धेः क्रिया अन्ततो गत्वा वस्तुतः अध्यात्मवादो न सौन्दर्यबोधं न च तच्चेतनाया लक्षणानि व्याख्यातुं क्षमते। कला स्वकीयां अभिव्यक्तिमभिलषते। सुखमन्यत् दुःखमचान्यत् इत्येतत् तद् दृष्ट्यां न पारमार्थिकम्। प्रमाता तु सुखदुःखादिकं समं पश्यति। पाश्चात्यमनोविज्ञानवेत्ता बेडलेमहोदयः काव्यमात्मनः स्वच्छन्दाभिव्यक्तिरिति काव्यस्यलक्षणं विदधाति। काव्यकलामानवजीवनादेव स्वाभिमतमु- पादानमुपादत्ते। तस्माद् कारणादेव सा मानवजीवनस्य मुख्यां प्रवृत्यामभिनिविशते। सैवकाव्यकला मानवजीवनपथं पुनाति। सा जीवनमुत्थापयति। जीवनं सत्यं वरीतुं नुदति। तदर्थं मंगलविधायकं संदेशं नुदति। वस्तुतः कला अस्ति सौन्दर्यम्, आनन्दस्तस्या असुत्वाय कल्पते। आत्मा च तस्याः रसः सुविदितः कलातत्वज्ञो हरवर्टरीडो जीवनस्य चेतनायाश्च विकासव्यवस्थायाश्च प्रेरणां कलायाः सौन्दर्ये निहतां मन्यन्ते। कलायाः महत्वपूर्णं कार्यमस्ति सौन्दर्योद्घाटनम् । इदं सौन्दर्यं रसस्याधायकम। तमेवरसं

रसिकमास्वादयति।रसास्वादनायमनसो रेचनमपेक्ष्यते। यावन्मनोरेचनं स्यात् तावदेव रसानुभूत्यां तीव्रतोद्भवेत्।

वस्तुतः कला कलायाः कृते ये वदन्ति तेषां कवीनां काव्यानि सहृदयावर्जकानि भवन्ति। विविधालङ्कार मण्डितानि काव्यानि कला-कलितानि जायन्ते। तैः शब्दार्थचमत्कार प्रसाधनैः प्रसाधितानि चमत्कृतिं व्युत्पादयन्ति। तेषां भावात्मकं सौन्दर्य तत्रत्याभ्यन्तरी काव्यकलायाः महनीयायाःमहत्तायाः शोभा भवति। वस्तुतः कला कलायाः कृते ये प्रतिपादयन्ति तेषां कवीनां काव्यानि मनोरञ्जकानि तु भवन्त्येव तेनैव सह विविधालङ्कार शब्दार्थचमत्कार प्रसाधनैः प्रसाधितानि सुगुम्फितानि सुश्लिष्टानि जायन्ते। तेषां भावात्मकं सौन्दर्य तत्रत्याभ्यन्तरी शोभा वा बाह्याशोभाविद्युत तरलतया चारुतया आव्रियते।

कलामानव जीवनोत्थापनाय ये वदन्ति तेषां काव्ये शब्दचित्रतायाः प्राधान्यं प्रायः न लोचनपथमवतरति। न तानिकाव्यानि अलंकार, शब्दचमत्कारचारुता चञ्चच्छटाभिराक्रान्तानि भवन्ति। तेषां काव्यं मानवजीवनोत्थाय एव भवति। चेतनारूप कारणात् चेतनारूपकार्यमुद्भवति। चेतनारसचेतनयोर्मध्ये कोऽपि भेदो नास्ति। चेतनारूपकारणस्य सर्वाण्यपि लक्षणानि रसानुभूति रूपकार्येऽपि व्याप्तानि भवन्ति। यथादुग्धरूपकारणस्य दधिरूप कार्यपरिणामस्तथैव चेतना रूपकारणस्य रसचेतनारूपकार्यपरिणामो ज्ञेयः। यदि वयं रसनिष्पत्तिविषयकानां विविधानामाचार्याणां मतमवलोकयामः तदा ज्ञायते यत्तेषां सर्वेषामप्याचार्याणां मतं दर्शनशास्त्रमवलम्ब्येव वर्तते। भट्टलोलट्ट कृतेयं रससूत्रस्य व्याख्या मीमांसासिद्धान्तमूलकेति व्यवह्रियते। आचार्य शंकुकमतंन्यायदर्शनमधिकृत्य वर्तते।भट्टनायकस्य भुक्तिवादः सांख्यमतमवलम्ब्य वर्तते।आचार्याभिनवगुप्तस्य रसदर्शनम् शैवदर्शनमवलम्ब्य वर्तते। रसानुभूतिः पूर्णा च सुस्पष्टाञ्चावस्थां प्राप्य वाणीबलसम्पन्नमेव जायते। मीमांसकः एकतः कलासृष्टिनिष्ठसौन्दर्यस्यप्रभावं प्रत्य क्रमवगाहते।पाश्चात्यमनोवैज्ञानिकानां मतेन रसानुभूतिः सुषुप्तितः स्वप्नतश्च भिन्नानि। रसानुभूत्यां स्वप्नस्य सन्ति तत्वानि परं तानि स्वप्नभूतानि न, तत्र तु चेतनास्ति जागृतावस्था च वर्तते।रसानुभूत्यां कल्पनातः प्राप्ता मानसप्रतिमाः केवलं न अपितु तन्त्रेन्द्रिय संस्प र्शजनितानेक गोचरतत्वानां प्रत्यक्षप्रतीतिरपि संतिष्ठते। मनोविज्ञानं रसमर्म्मावगन्तुं यतमानमवेक्ष्यते। दर्शनमनोविज्ञानयोर्प्राविधिकीं शब्दावलीं परित्यज्य सामान्यतया शब्दावल्यां वक्तुं शक्यते यत् 'शब्दार्थमाध्यमेन भावस्यकलात्मिकाभिव्यक्तिः काव्यमिति।' तस्य चानन्दस्यास्वादो रस इति। शब्दार्थमाध्यमेनाभिव्यक्तस्य भावस्यानन्दमयास्वादः एव रस इत्याशयः। नूनमयमस्वादो विषयिगतः न तु विषयगतः इयं हि आस्वादयितुमेव रसानुभूतिः। मनोविज्ञानपण्डितेषु भावस्य मानसिक शारीरिक रूपाणाम् पूर्वापर कार्यक्रमधिकृत्य भूयान् विवादः प्रचलति। जेम्समैक्डूगलप्रभृतयो वदन्ति यद् भावस्य मानसिकरूपं शारीरिकरूपस्य परिणामोऽस्ति। संस्कृतकाव्यशास्त्रे लौकिकस्यभावस्य

वर्णनं स्वभावादेव नासीत। तत्र तु काव्यगतानां भावानामेवरसः। परमेते हि काव्यगताः रस व्यञ्जकाः वा भावाः नूनमेव चित्तिवृत्तिरूपाः। भावशब्देन तावत् चित्त वृत्तिविशेषाः एव विवक्षिताः इति। अतश्चित्तवृत्याधारेण मनोविज्ञानानुसारेण च स्थायिसञ्चारिभावाः विवेचयितुं शक्यन्ते। आचार्यभरतादारभ्य पण्डितराजजगन्नाथपर्यन्तं यावत् स्थायिसञ्चारिविवेचनं प्रायः सर्वैराचार्यैः कृतम्। अत्र प्रत्याचार्य मत पृथगुल्लेखपेक्षया सर्वविवेचन सार प्रस्तुरिति समीचीना स्यात् इतयस्माभिर्प्रयत्नः कृतः। स्थायीभावाः वासनात्मतया प्रमातृचित्ते तिष्ठति। कारणोस्थितरनन्तरापि ततत्तामवति। सञ्चारिणस्तु कारणनुपस्थितो निःशेषतामेव श्रयन्ते। स्थायिभावाः स्थिराः, सञ्चारिभावाश्चास्थिरामनोदशेति। प्रतिसहृदयहृदयं हि वासनात्मतया स्थितेः स्थायिनः साधारणैकरणं सुकरं भवति। मनोविज्ञानेभावानां वर्गविभाजनं नूनमिदमन्ततया न संभवति। मनोविज्ञानं हि विज्ञानम्। विज्ञानमुपयुक्तमनुपयुक्तं सुन्दरमसुन्दरम् साधु-असाधु, तीव्रं-मन्दमुपाध्याधारेण कदापि वर्गीकरणं न करोति। तथापि जीवनेऽस्तयेवेतादृशी भेदाः। विज्ञानम् नात्र प्रपञ्चेनिपतति। एतस्य ततपरिधिर्बहिर्गतत्वात्। अत्र स्पष्टं भवति यत् भरतवर्णनं कियन्मात्रतया वैज्ञानिकम्। विभावान्तर्गतत्वेन शून्यस्थानान्धकारः विकृत्वा अपरिचिता करादिनाम् व्यभिचार्यानुभावान्तर्गतत्वेन च स्तम्भ-स्वेद-स्वरभङ्गहृदय शरीरकम्प परित्राणान्वेषण त्रास पूर्वकपलायन जडता त्रासावेश चपलतादीनाम् भरतेन तथा प्लैचरनामकेन मनोवैज्ञानिकेन समानमेव वर्णनमेवकृतम।मनोविज्ञाने तु सामान्येनमनोवेगानां संख्यायाः प्रश्न एव नोदेति। किन्तु सहजवृत्तीनां सम्बन्धे यासांवर्गीकरणस्य प्रयत्नः समये-समयेऽक्रियत तदा मनोविज्ञानां गणनाऽप्यावश्यकं भवति। प्रायः मनोवैज्ञानिकानां मतेन यज्जीवे स्वभावतः काश्चनमूलवृत्तयो भवन्ति। तदनुसारेण मूलवृत्तिः सा प्राकृतशक्तिरस्ति यया प्राणी विना प्रयत्नेन कार्यविशेषे प्रवर्तते। अस्यां प्रक्रियायाच्च विश्ष्टिरूपं कमपि मूलवृत्तिः सानुवंशिकी सहजामानसिकी शारीरिकी च प्रवृत्तिरस्ति यस्याः प्रेरणया प्राणी कस्यचित्पदार्थ विशेषं प्रत्यक्षंज्ञानमर्जयति। तं प्रत्यवदधति। तदुपस्थितौविश्ष्टि च कमपि मनः संवेगमनुभवति रीतिविशेषेण च तद्विषये क्रियाशीलोभवति। क्रियाशीलीभवितुं वाऽऽवेगमनुभवति। मनोविज्ञानस्य विकासक्रमे मैग्डूलनस्य स्थितिः प्रायो मध्यवर्तिन्यस्ति। तस्यविचाराः जैम्सशैडादिवत् प्राचीनाः न सन्ति न वा अत्याधुनिक अमेरिकामनोवैज्ञानिकवत् सर्वथा नवीनाः एव। परमेतेषां सम्बन्धः शारीरिक क्रियाभिः सहाधिकोऽस्ति।

अत एवासांसहकारीमनोविकारो मनः स्थितिर्वा नातिस्पष्टा नापिविश्ष्टा भवति। इमां नूनं नास्माकं विशेषणोपयोगिन्यः। प्रायः पाश्चात्यमनोवैज्ञानिकानामानुसारेण प्रवृत्तिमूलकाः मनोविकाराः साधारणतया दशैव भवन्ति रतिहासक्रोधभयजुगुप्सौत्सौक्यवात्सल्याहंकारार्ति सहानुभूतयः।एषु प्रथमे सप्त

संस्कृतोक्तस्थायिभवेभ्यः प्रायो न भिद्यन्ते। अद्यतनंमनोविज्ञानं मैग्डूलनाददूरमगसृतम्। मूलवृत्तीनांवर्गीकरणे संख्याने चापि भूयसी प्रवृत्तिर्जायतेत्यत्र नास्ति संदेहः। वस्तुतः स्थायिभावानां स्थितिः पौरस्त्यपाश्चात्यमनोविज्ञानात्प्रतिकूला नास्ति। संख्यानिर्धारणमपि न सर्वथा निराधारम्। आचार्यभरतविवेचनैः स्पष्टं 'यथा तस्य दृष्टावमीषां भावानामभिनयात्मकं रूपमेव प्रमुखम्, मनोवैज्ञानिकं तु गौणम्। केचनमनोवैज्ञानिकैः पौरस्त्य विचार शास्त्रानुसारेण चतुर्षष्टिः मनोविकाराः परिगणिताः। येषूक्तानुक्ता अनेके मनोविकाराः संस्कृतसाहित्यशास्त्रीयाणाम् त्रयस्त्रिंशतो द्विचत्वारिंशतो वा सञ्चारिणाम् परिधेर्बहिः पतन्ति। मनोविकाराः हि मनोवस्तु प्रति प्रतिक्रियाः सन्ति। याः प्रतिवस्तु परिवर्तन्ते।मनस्यनेके तरङ्गाः उद्भवन्ति ते मिथोऽनेकैःरूपैर्मिलिता न जाने कति-कति मनोविकारान् भावयन्ति। वस्तुतः रससिद्धान्तस्य वास्तविकमाधारो भाव एव। यस्यभेदानां गणना न संभवति, नाप्यपेक्षते। गम्भीरचेतोभिराचार्यैरपि संख्यायै महत्वविशेषो न दत्तः। अथ एवैकतः सर्वेषामपि रसानामेकस्मिन्नेव समाहरणायमनोबुध्यादिकानां च वृत्तयः कामपि विन्दमाना विराजन्ते। परं वृत्तीनां निरोधान्न मनः समाधौ गतिमुद्भवति। तस्यशून्यत्वात् सम्पूर्णवृत्तीनामलसात्मिकया गत्या सौन्दर्येऽवगाहते। वस्तुतस्तु अध्यात्मवादो न सौन्दर्यबोधं न च तच्चेतनायाः लक्षणानि व्याख्यातुं क्षमते। प्रायः रसस्यशास्त्रीयं स्वरूपं भरतमुनेर्नाट्यशास्त्रादेव पण्डिताः स्वीकुर्वन्ति।

संदर्भग्रंथाः-----

१-साहित्यदर्पण :: ३:२
२-अथर्ववेद :: १०:५:४४
३-कठोपनिषद् :: ४:३
४-छांदोग्योपनिषद्::
५-वाल्मीकीयरामायण :: बालकाण्ड
६-कामसूत्रम् :: २:१:६५
७-कामसूत्रम् :: २:१:६५
८-नाट्यशास्त्रम् :: १:१७
९-वाल्मीकीयरामायण ::
१०-ध्वन्यालोकः :: १
११-तैत्तिरीयोपनिषदि :: २:१
१२-कठोपनिषदि :: ४:३
13-कठोपनिषदि :: २:३
१४-छांदोग्योपनिषदि :: २:३
१५-ऋग्वेद :: ८:१:२६

१६-ऋग्वेद :: ८:१:२६

१७-ऋग्वेद :: ८:१:२६

१८-ऋग्वेद :: ८:१:२६

०१६-वाल्मीकीयरामायण:: १:४

२०-श्रीमद्भगवद्गीता :: १५:६

२१- श्रीमद्भगवद्गीता::

२२-उपनिषद् ::

२३-काव्यमीमांसा :: प्रथमोध्यायः पृष्ठ-१

२४-भावप्रकाशन :: पृष्ठ-४७

२५-नाट्यशास्त्र :: १:२६